Colophon :—

इति दानवाक्यावली समाप्ता ।

Post Colophon Statement : —

संवत् १६१२ वर्षे आषाढ़ वदी ६ भौमे लक्ष्मीनाथभट्टात्मजेन लोकनाथेनालेखि ॥

शुभमस्तु । श्रीमदनगोपालाय नमः । श्रीरामचन्द्राय नमः ।
श्रीलक्ष्मीकान्ताय नमः ।

2394.

5545. **दानवाक्यावली ।** *Dānavākyāvalī.*

By Vidyāpati.

Substance, country-made paper. 12½ × 5 inches. Folia, 6 to 64. The first five leaves are missing. Lines, 12 on a page. Extent in ślokas, 2,200. Character, Nāgara of the eighteenth century. Appearance, discoloured.

End :—

यावत् स्वर्गतरङ्गिणी हरजटाजूटान्तमालम्बते
यावद्दिग्विकाशविस्तृतकरः सूर्य्योऽयमुज्जृम्भते ।
यावन्मण्डलमैन्दवं वितनुते शम्भोः शिरोमण्ड(लं)[न]
तावत् कीर्त्तिलतेव वस्तुसफला देव्याः सतां श्रेयसे ॥
निबन्धान् सम्यगालोक्य श्रीविद्यापतिसूरिणा ।
दानवाक्यावली देव्याः प्रमाणैर्विमलीकृता ॥

Colophon :—

समस्तप्रक्रियाविराजमान-दलितकल्पलताभिमान-भवभक्तिभावित-

वर्द्धमानमहामहादेवीश्रीधीरविरचिता दानवाक्यावली समाप्ता ।

शुभमस्तु । क्षणो जयति ॥

2395.

8509. **दानवाक्यावली** । *Dānavākyāvali.*

Substance, country-made paper. 10¼ 4¼ inches. Folia, 6 Lines, 9 on a page. Extent in ślokas, 114. Character, Nāgara. Date, Samvat 1911. Appearance, fresh. Complete

Colophon :—

दानवाक्यावली समाप्ता ।

Post Colophon :—

जागेश्वरेण लिखितं शिवार्पणमस्तु सं१९११ शाके १७७६ पौ०

मा० कृ० ति० १० शु० ।

Eulogies of religious gifts.

Beginning :—

श्रीगणेशाय नमः ॥

अथ दानवाक्यावली लिख्यते ।

अथ धान्यदानं ।

धान्यीकरोति दातारं इह लोके परत्र च ।

तस्मात्त्वमुच्यते धान्यमतः शान्तिं प्रयच्छ मे ॥

सर्व्वदेवमयं दानं सर्व्वोत्पत्तिकरं महत् ।

प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ॥

अन्नदानस्य, etc.

2396.

9704. **दानपञ्जी ।** *Danapañji.*

By Ratnakara Thakkura.

Substance, country-made paper. 13 × 5 inches. Folia, 34. Lines, 11 on a page Extent in ślokas, 900. Character, Nāgara. Date, Saṃvat 1866. Appearance, tolerable. Complete.

See L., Vol. VI, p. 23, No. 2002.

The last colophon runs :—

इति श्रीरत्नाकरठक्कुरविरचिता दानपञ्जी पूर्णतामगात् ।

संवत् १८६६ ।

This is a summary of Dānāsagara which may be either by Vallālasena or by Maharājādhirāja-niḥśaṃkara-bhuvanajyotiḥ Śrī Kamadeva (L. 2179). It quotes: 2B, Harihara; 11A, Kamadhenu, Dānakaṇḍa; 20A, Kalpataru, Viṣṇudharmottara; 22A, Danadharma; 26A, Danasāgara; 27A, Dānaratnākara.

2397.

5518. **दानपद्धतिः ।** *Dānapaddhatiḥ.*

By Rūpanārāyaṇa.

Substance, country-made paper. 9 × 4 inches. Folia, 122 to 194, of which folia 129 and 191 are missing. Lines, 10 on a page. Character, Nāgara of the sixteenth century. Appearance, discoloured.

A mere fragment :—

122B, अथ हिरण्यगर्भदानम् (Then follow the Mantras of all the sixteen saṃskaras of the four Vedas, which are incidentally treated of, as they qualify the donor for making 'the great gifts').

140B, इति हिरण्यगर्भमहादानप्रयोगपद्धतिः, अथ [illegible]दानम् ; 149A, अथ कल्पपादपदानम् ; 153A, इति रूपनारायणीयदानपद्धतौ कल्प-

पादपमच्छादानपद्धतिः ; 163B, इति कामधेनुमच्छादानप्रयोगपद्धतिः ; 167A, इति हिरण्याश्वदानप्रयोगपद्धतिः, अथ हैमाश्वरथदानम् ; 173B, अथ पञ्च-लाङ्गलदानम् ; 179A, अथ पृथ्वीदानम् ; 184B, विश्वचक्रमच्छादानप्रयोगः ; 192A, अथ सप्तसागरमच्छादानम् ।

The authorities quoted :—

123A, दानसागर-कामधेनु-योगीश्वरेषु, रत्नाकरे ; 123B, मुक्तावली ; 126B, चतुर्वर्गचिन्तामणिमते, दानरत्नाकरमते ; 127A, दानोद्योतमते ; 160B, लक्ष्मीधरः ; 166A, इति भोजराजसागरकामविद्याधराः चिन्तामणि-रत्नाकरपारिजातपद्मे ।

2398.

5485 **दानवाक्यसमुच्चयः** । *Dānavākyasamuccayah.*

By Yogīsvara.

Substance, country-made paper. 11×5 inches. Folia, 31. Lines, 8 on a page. Extent in Ślokas, 500. Character, Nāgara. Date, Samvat 1685. Appearance, discoloured. Complete.

It begins thus :—

नमो विघ्नविनाशनाय नमः । श्रीसरस्वत्यै नमः ।

पुराणस्मृतिवाक्यानि परामृश्य बुधैः सह ।

योगीश्वरेण क्रियते दानवाक्यसमुच्चय[ः] ॥

उपोद्य दानसामग्र (?) विज्ञेया वाक्यसङ्गता ।

प्रसङ्गात् जाड्यदोषादिवाक्यमप्यत्र दर्शितम् ॥

. . .तत्र धेनुगुड़दानम् ।

खुरपुटविवर्ज्जितं क्षणामृगचर्म्म तथा स्वल्पहिरण्यचर्म्म गोमय-विलिप्तायां भुवि कुशानास्तीर्य्य मृगाजिनद्वयं प्राग्ग्रीवं स्थापनीयम् । तस्योपरि गुड़ेन प्राङ्मुखी उदक्या(दा)[द्यवस्था](त्सा) धेनु[ः] कल्पनीया । ... ...

ॐ अद्य अमुकस्मिन् काले अमुकगोत्रायामुकदेवशर्म्मणे क्षणाजिनस्थितां गुड़कल्पितां [illegible]याङ्गीं गन्ध(घ्रा)(घ्रा)णां नानाफलदन्तां मुक्तापलेक्षणां इन्द्रनील-तारकां विद्रुमभ्रुयुगां मुक्तिकर्णां सितकम्बलकम्बलां सितसूत्रशिरोजां सुवर्णघण्टां

रूप्यच्छुरां ताम्रकर्णां जुकर्ष्णां सितचामररोमिकां कांस्योपदोहां नवनीतस्तनीं इक्षुदण्डपादां क्षौमपुच्छां सितवस्त्रयुगान्वितां धेनुकामजिनस्थितगुड़कल्पित स्वरूपवत्ससहितां श्रीदेवतां इमां गुड़धेनुं स्वर्गकामस्तुभ्यमहं सम्प्रददे ।

End :—

पुराणागमवाक्यानि, etc., etc.

Colophon :—

इति दानवाक्यसमुच्चयः समाप्तः । सम्पूर्णोऽयं (?) दानवाक्यम् ।

Post Colophon Statement :—

संवत् १६८५ वर्षे भाद्र वा सुद्य ११ शुक्रे लषितं नवापुरवास्तव्यं उदीच्यज्ञातीय ज्ञा० वीरजीलषितं सम्पूर्णम् ।

श्रीरस्तु । कल्याणमस्तु ॥

The author seems to be the same as Yogīśvara who wrote in collaboration with Padmanābha the work entitled Tithyadinirnaya at Benares in the pre-Muhammadan days

2B, इति गुड़धेनुदानवाक्यम् ; 3B, इति घृतधेनुदानवाक्यम् ; 4B, जलधेनुदानवाक्यम् ; 5A, इति तैलधेनुदानवाक्यम् ; 5B, इति क्षीरधेनुदान-वाक्यम् ; 6A, इति मधुधेनुदानवाक्यम् ; 6B, इति शर्क्कराधेनुदानवाक्यम् ; 7A, इति दधिधेनुदानवाक्यम् ; 7B, इति रसधेनुदानवाक्यम् ; 8A, इति लवणाधेनुवाक्यम् ; 8B, इति सुवर्णघण्टकी दानवाक्यम्, इति उभयतोमुखी-दान-वाक्यम्, 9A, इति महासुवर्णघण्टकी-दानवाक्यम्, इति तिलपात्रदानवाक्यम् ; 9B, इति महातिलपात्रदानवाक्यम् ; and so on.

2399.

5479. **दाननिर्णयः** । *Dananirṇayaḥ.*

By Śrīkṛṣṇa Datta.

Substance, country-made paper. 10½ × 3 inches. Folia 49, of which the first is missing. Lines, 5. 6 on a page. Extent in ślokas, 1,000. Character, Nāgara. Date, Saka 1415. Appearance, old.

A treatise on religious gifts.

Composed in Śaka 1415=1493 A.D.

It ends:—

मलिनास्तु कलौ ये च पापपङ्कैर्नराः सदा
तेषां सन्तरणार्थाय दाननिर्णयसंज्ञकः] ।
ग्रन्थोरचि द्विजेनैषः सर्व्वधर्म्मप्रबोधकः
दानग्रन्थवरः पूर्णो ब्रह्मदत्तसूतेन च ।
क्षणदत्तेन धीरेण श्रीगणेशाय + + ।
× × × × × × × × सुधीभिः प्रतिगृह्यताम् ॥

इति श्रीआवसथिक-ब्रह्मदत्तात्मज क्षणदत्त-विरचिते दाननिर्णये नक्षत्रदानविधिः ।

तिथिग्रन्थकृते ग्राके माधवे मेषभास्करे ।
क्षणदत्तैः + + ग्रन्थोऽयं दाननिर्णयः ॥

शुभं भवतु । ग्रन्थसंख्या ११८२ ।

Then in a later hand:—

श्रीविष्णुभट्टानां ।

II.

There is also a fragment of another treatise on religious gifts by Sūrjakara Śarmā, containing the first two leaves only.

For this work, see infra.

It begins:—

नीवीबन्धविधूननोद्यतकरो गाढ

2400.

1083. दानपञ्जी । *Dānapañjī.*

By Sūryyākara.

Substance, country-made paper. 12×3¼ inches. Folia, 37. Lines, 10 on a page. Extent in ślokas, 1,480. Character, Nāgara. Date, Saṃvat 1872. Appearance, tolerable. Complete.

Beginning : —

श्रीगणेशाय नमः ।

नीवीबन्धविधननोद्यतकरो राधारतेरिच्छया
क्षणास्तत्त्क्षणमागतामभिमुखीं दृष्ट्वा यशोदां रुदन् ।
हे मात र्निजुगोप गोपवनिता मत्वान्दुकं वास(सौ)[से]-
त्येवं व्याजमुदीरयन् हरतु वः पापानि धूर्त्तक्रियः ॥
द्रोणवंशसमुत्पन्नो देवसिंहतनूद्भवः ।
धर्म्मैकर्म्मवतः श्रीमान्नवराजो विराजते
श्रीमता नवराजेन सर्व्वपापप्रणाशिनी ।
क्रियते दानपञ्जीयं कलौ गङ्गेव निर्म्मला ।

अथ दानप्रशंसा ॥ इत्यादि ॥

A compilation on religious gifts by Mahāmahopādhyāya Sūryakara Sarmā, under the patronage of Navarāja, son of Deva Siṅha of Droṇa dynasty.

The name of the real author is given as Sūryakara Sarmā in the 4th verse in the present MS. :—

नानापुराणमालोक्य सारमुद्धृत्य यत्नतः ।
कृतोसौ द्विजमुख्येन श्रीसूर्य्यकरशर्म्मणा ॥

See L., 1840 and Peters., 5, No. 109.

Col. :—

इति श्रीसार्व्वभौमराजपट्टाभिषिक्त-द्रोणवंशतिलकायमान-देव-सिंहतनूद्भवेन श्रीनवराजेन कारिता श्रीमद्दामद्दोपाध्यायश्री-सूर्य्यकरेण कृता दानपञ्जी समाप्ता ।

Post Col. :—

संवत् १८७२ । श्रीरामाय नमः ॥

It quotes, besides the Purāṇas :—

7A, वामनपुराणे; 12A, दानकाण्डादौ; 20A, दानधर्म्मे, दानसागरे, कामधेनौ; 23B, दानधर्म्मोत्तरे; 27B, दानरत्नाकरे ।

2401.

4104. दानदीपावली । *Dānadīpāvalī.*

By Yogīśvara, under the patronage of Gajapati, Nihśaṅkabhānu

Substance, palm-leaf. 15 × 1 inches. Folia, 92. Lines, 6, 7 on a page Character, Udiya of the early eighteenth century. Appearance, soiled and worn out. Incomplete

It begins :—

श्रीगणेशाय नमः ।

ॐ जय सर्व्वसुरासाध्य जय संसारमोचन ।

जय विघ्नतमश्चन्द्र जय सिद्धिप्रदायक ॥

लम्बोदरमवलम्बे जयमविलम्बे ददानमपवार्धं

यन्मौलिचन्द्रलेखाः + + + जयन्ति ॥

+ + + + ष्यामगण्डलं मण्डयन्

श्रीलक्ष्मीधरप्रोक्ष-प्रविलसज्जाया मङ्गाभ्रतिमान । (?)

योऽयं भृत्यस्वभाव (?) प्रभवजयभरप्रीतिदत्तात्तभक्तिः

श्रीमन्निःशङ्कभानुः क्षितिपपदयुगाम्भोजयोः + + । ॥

Then, after a lacuna :—

श्रौतस्मार्त्तादितत्तद्पायपरिचयात् भारताद्युक्तवर्त्ति (?)

नित्यानुष्ठानकैलासचरितनिलयासत्यवैश्वानरार्त्तिः (?) ।

श्रद्धाभाजां बुधानां विरचयति तदंगमार्गप्रकाशं

(?) यसन् (lacuna).

देवलयाज्ञवल्क्यौ शङ्खलिखित-गौतमा दक्षवसिष्ठवशिष्ठौ विष्णुदक्षस्मृति-पराशराङ्गिरसयोगियाज्ञवल्क्यातातपमरीचिसहिष्णुः (?) सम्वर्त्तापस्तम्बौ लघु-हारीतः सहारीतः दानोद्हासो व्यासः सलघुशाट्यायनबौधायनश्चायुपलिकप्रभृतय-श्चालिखितानि (?) निरूप्य निपुणं स्मृतयः षट्त्रिंशन्मतं यावत् ।

वैष्णवमार्कण्डेये मात्स्यं कौर्म्मं वराहं नरसिंहवायुवामनगारुडम् पाद्मं तथादित्यं साम्बञ्च तथा ब्राह्म ब्रह्माणं (lacuna) महाभारतमन्यादि गोत्रादि (?)

ज्योतिषनानागममतैर्वाक्यैः प्रामाणिकैरनुस्मृतानि

अथ दानपरिभाषा—

सकलधर्म्मस्य श्रुतिस्मृतिपुराणमूलत्वात् फलोपलब्धिव्यतिरेकेण लोकप्रवृत्तेरभावाच्च तथाच सामवेदोपनिषदादिषु दानेन सर्व्वान् कामानवाप्नोति चिरञ्जीवित्वं ब्रह्मचारिरूपवान् हि स उपपद्यते।

Colophons :—

4A, इति श्रीमन्महाराजाधिराजराजपतिनिःशङ्कभानोः ललितपदकमलधूलिकलापालङ्कृतगात्र-योगीश्वरविरचितायां दानदीपावल्यां पण्यदेयप्रकीर्त्तनं नाम प्रथमोऽध्यायः; 12B, ०पात्रापात्रनिरूपणं नाम द्वितीयोऽध्यायः; the colophon of the third is not to be found; 33B, ०तुलापुरुषमहादानविधानं नाम चतुर्थोऽध्यायः; 36B, ०हिरण्यगर्भमहादानविधानं नाम पञ्चमोऽध्यायः; 38B, ०ब्रह्माण्डदानमहाविधानं नाम षष्ठोऽध्यायः; the colophon of the seventh is not to be found; 43A, ०गोसहस्रमहादानविधिर्नामाष्टमोध्यायः; 44A, ०कामधेनुमहादानविधिर्नाम नवमोऽध्यायः; 45B, ०हिरण्याश्वमहादानविधिर्नाम दशमोऽध्यायः; 47A, ०हिरण्याश्वरथमहादानविधिर्नामैकादशोऽध्यायः; 48A, ०हेमहस्तिरथमहादानविधिर्नाम द्वादशोऽध्यायः; 50A, ०पञ्चलाङ्गलकमहादानविधिर्नाम त्रयोदशोऽध्यायः; 51B, ०धरामहादानविधिर्नाम चतुर्दशः; 53B, ०विश्वचक्रमहादानविधिर्नाम [पञ्चदशः सर्गः]; 55A, ०कल्पलतामहादानविधिर्नाम; 56B, ०सप्तसागरमहादानविधिर्नाम; 59A, ०रत्नधेनुमहादानविधिर्नाम; 60B, ०महाभूतघटमहादानविधिर्नाम; 72A, ०धान्याचलादिदशाचलविधिर्नाम विंशतितमोऽध्यायः; 78B, ०गुडधान्यादिधेनुदानविधिर्नाम एकविंशतितमोऽध्यायः; (the leaves after the 80th have been left unmarked); 86A, ०सप्तदेवतालङ्कृतादिगोदानविधिर्नाम द्वाविंशतितमोऽध्यायः; 87A,. ०त्रयोविंशतितमोऽध्यायः; 91B, ०भूमिदानविधिर्नाम चतुर्विंशतितमोऽध्यायः॥

After this there is only one leaf in which the MS. comes abruptly to an end.

2402.

5762. **तुलामहादानप्रयोगः** । *Tulamahadanaprayogah.*

Being an extract from Prayogaratna of Narayana Bhatta, son of Rāmesvara Bhatta

Substance, country-made paper. 9½ × 5½ inches. Folia, 32. Lines, 16 on a page. Extent in slokas, 1,100. Character, Nāgara of the eighteenth century. Appearance, old and repaired. Complete.

Beginning :—

श्रीगणेशाय नमः ।

विघ्नेश-वाग्यौ रघुनाथतातौ
प्रणम्य रामेश्वरभट्टसूनुः ।
नारायणाभ्यस्तनुते विचार्य्य
तुलामहादानविधिप्रयोगम् ॥

Colophon :—

इति श्रीभट्टरामेश्वरसूनुश्रीनारायणभट्टकृते महादानप्रयोग-रत्ने तुलामहादानप्रयोगः ।

2403.

2311. **तुलापुरुषपद्धतिः** । *Tulapurusapaddhatih.*

Substance, country-made paper. 9 × 3 inches. Folia, 31. Lines, 7, 8 on a page. Extent in slokas, 150. Character, Nāgara. Date, Samvat 1662. Appearance, old and discoloured. Complete.

An anonymous manual for the performance of the rite of तुलादान, which requires distribution to Brahmaṇas of rice, cloth, gold, silver and other metals of the weight of the performer of the rite.

It begins :—

नत्वा विश्वेश्वरं देवं गिरिजां च विनायकम् ।
स्मृतिपुराणनिबन्धांश्च आलोक्य वै सुनिश्चितः ॥
क्रियतेसौ महादानप्रयोगः सद्भिरेच्छया ।

It ends :—

आलोक्य सर्व्वशास्त्राणि कृतेयं पद्धति र्मया ।
पश्यन्तु तेन वै सन्तो अयोग्यास्तु कुबुद्धयः ॥

Col. :—

इति श्रीतुलापुरुषपद्धतिः ॥

Post Col. :—

संवत् १६६२ वर्षे माघवदि प्रतिपदि लिखितं चिन्तामणि-दीक्षित ॥ श्री ॥ आत्मपठनार्थं वा परोपकारार्थम् ।

2404.

6260. **तुलादानविधिः** । *Tulādānavidhiḥ.*

Substance, country-made paper. 12×5 inches. Folia, 12. Lines, 9 on a page. Extent in Slokas, 192. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon :—

इति तुलादानविधिः ।

Beginning :—

श्रीगणेशाय नमः ।

तुलादण्डस्य चतुर्विंशतिदेवता धातुबन्धे यथागाढं पौराणैर्वैदिकैर्मन्त्रैः स्थापयेत् ।

ते च मन्त्राः ।

पञ्चवक्त्र वृषारूढ़ प्रतिवक्त्रत्रिलोचन ।
कपालशूलखट्वाङ्ग चन्द्रमौले महाग्निव ॥
आगच्छ भगवन्नीश तुलाबन्धमलंकुरु ।
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं ।
पूषाणो यथावेद साम सुबन्धे रक्षिता पायुरदब्धः स्वस्तये ॥

2405.

9310. **तुलादानप्रयोगः** । *Tulādānaprayogaḥ.*

Substance, country-made paper. 8 × 5 inches. Folia, 4. Lines, 11 on a page. Extent in Slokas, 70. Character, Nāgara. Date, Samvat 1874. Appearance, tolerable. Complete.

Beginning :—

अथ घृतादितुलादानप्रयोगः । तत्र कर्त्ता स्नातः शुचिः शुक्लद्विवासः प्रक्षालितपाणिपादः आचम्य प्राणानायम्यमकुणाक्षतजलहस्तः प्राङ्मुख इत्यादि ।

Post Colophon :—

श्री संवत् १८७४ मासोत्तमे मासे पौषे मासे कृष्णपक्षे सप्तम्यां सनिवासरे ऊग्रनाथमिश्रेण लिख्यते शुभं भूयात् ।

2406.

2361. **तुलापुरुषदान [पद्धतिः]** । *Tulāpuruṣadāna-paddhatiḥ.*

Substance, country-made paper. 8¾ × 4¼ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 36. Character, Nāgara of the later seventeenth century. Discoloured and brittle at the edges. Complete.

This is the shortest work on the subject yet known.

Beginning :—

अथ तुलापुरुषदानम् ।

कर्त्ता मासपक्षाद्युल्लिख्य अमुकफलकामोऽमुकरोगनिवृत्तिकामः सर्व्वत्र गौरीसदनपुण्यप्राप्तिश्लोकदुर्गतिनिवृत्तिकाम ईश्वरप्राप्तिकामो वा अमुकतुलादानं करिष्ये इति संकल्प्य गणेशपूजाचार्य्यवरणतत्पूजनादि कुर्य्यात् ।

End :—

ततो यजमानस्तत्प्रतिमादि आचार्य्याय करे प्रतिपाद्य त्रीन् विप्रान् संभोज्यभूयसीं दक्षिणां दद्यादिति तुलापुरुषदानविधिः ।

Post Col. :—

अथ तत्तद्द्रव्येषु देवताः। लोहे महाभैरवः, कांस्ये पुषाश्विनौ च, सीसे वायुस्ताम्रे सूर्य्यः, पित्तले कुजः, रौप्ये पितरः, सुवर्णे सर्व्वदेवताः, फले सोमः, गुड़े आपः, ताम्बूले विनायकः, पुष्पे गन्धर्व्वाः, काष्ठेष्वग्निः, मधुनि यक्षः, घृते मृत्युञ्जयः, क्षीरे तारागणाः, दधि सर्पाः, पिष्टे प्रजापतिरन्ते सर्व्वदेवताः। १८

2407.

3700. **तुलापुरुषदान [प्रयोगः]**। *Tulāpuruṣadānaprayogaḥ.*

Substance, country-made yellow paper. 13 × 3 inches. Folia, 4. Lines, 8 on a page. Extent in ślokas, 100. Character, Bengali of the nineteenth century. Appearance, fresh. Complete

Colophon :—Nil.

Beginning :—

"अथातः सम्प्रवक्ष्यामि महादानानुकीर्त्तनम्।"

इत्यभिधाय मत्स्यपुराणं

आद्यन्तं सर्व्वदानानां तुलापुरुषसंज्ञितम्॥

End :—

अनेन विधिना यस्तु तुलापुरुषमाचरेत्।

प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत्॥

विमानेनार्कवर्णेन किङ्किणीजालमालिना।

पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत्।

Post Colophon :—

श्रीश्यामाचरणादेवशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च ॐ दुर्गा।

2408.

5177. **तुलापुरुषदानविधिः**। *Tulāpuruṣadānavidhiḥ.*

Substance, country-made paper. 15 × 3¼ inches. Folia, 7. Lines, 6 on a page. Extent in ślokas, 100. Character, Bengali of the nineteenth century. Appearance, fresh. Complete.

Beginning :

अथ तुलापुरुषदानविधिः

मत्स्यपुराणे ।

षोड़शमहादानं यथा

तत्राद्यन्तु सर्व्वदानात् तुलापुरुषसंज्ञितम्

हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ॥

End :—

श्रद्धान्वितो भवति यज्ञमहस्रयाजी

दीप्तप्रतापजितसर्व्वमधीप्सालोकः (?) ।

यो दीयमानमपि पश्यति भक्तियुक्तः

सम्यक् प्रपद्यति विधिमेष समेत्यविघ्नं ॥

Colophon : —

इति तुलापुरुषदानं समाप्तम ।

It begins :—

अथोपयोगितया तत्र द्रव्याणां दानमस्याः आदौ उच्यन्ते ।

It ends :—

In पञ्चायतनदानम् ।

Both works appear to be incomplete, and at the end of both there is a statement that the MS. belonged to Gaṇeśa Deva and in the last he is described as the son of Śaṅkara.

2409.

2007. **दानसंक्षेपचन्द्रिका** । *Dānasaṃkṣepacandrikā.*

By Bhaṭṭa Divākara, son of Mahādeva and Gaṅgā.

Substance, country-made paper. 11 × 5½ inches Folia, 73. Lines, 11 on a page. Extent in ślokas, 1,600. Character, Nāgara of the eighteenth century. Generally correct. Incomplete, up to Ūrnāvastradānavidhi.

For a description of the work, see I.O. Catal., No. 1709.

Beginning :—

श्रीगणेशाय नमः । श्रीलक्ष्मीनृसिंहाभ्यां नमः

प्रणम्य मातरं गङ्गां भैरवं वनशङ्करीम् ।

महादेवाख्यपितरं श्रौतस्मार्त्तविशारदं ॥

दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः ।

शिष्टानां तन्यते तुष्ट्यै दानसंक्षेपचन्द्रिका ॥

तत्र परस्वत्वोत्पत्तौ द्रव्यत्यागो दानं इत्यादि ॥

2410.

2429. **दानचन्द्रिका ।** *Dānacandrikā.*

By Divākara Bhaṭṭa.

Substance, country-made paper. 11×5½ inches. Folia, 74 to 95. Lines, 11 on a page. Extent in ślokas, 550. Character, Nāgara of the eighteenth century. Appearance, discoloured and brittle at the edges.

This is a continuation of the previous number.

Dānacandrikā ends in leaf 90A.

Col. :—

इति काश्यां सत्कालोपनामभट्टरामेश्वरात्मज-भट्टमहादेवदिनकर-द्विजवर्य्यसूनुना बालंभट्टानुजभट्टदिवाकरविरचिता दानचन्द्रिका समाप्ता ।

The rest of the MS is taken up by another work of the same author :—

दानानि सर्व्वाण्यभिधाय तेषां

प्रतिग्रहे शुद्धिमतो विधास्ये ।

यथाधिया भावितया मादृतिः (?)

प्रतिग्रहे साधुजनस्य न स्यात् ॥

89B, कालोपनामरामेशभट्टसूनोः सुधीमतः ।

महादेवद्विजार्य्यस्य सूनुना प्रभविष्णुना ॥

दिवाकरेण रचिता दानसंक्षेपचन्द्रिका ।

गिरिजाजानितुष्ट्यर्थं मुदं वितनुतां सताम् ॥

91A, लिखनपरिश्रमवेत्ता भुवने विद्वज्जनो नान्यः ।
सागरलंघनखेदं हनुमानेकः परं वेत्ति ॥

2411.

3278. **दीपदानप्रयोगः** । *Dīpadānaprayogaḥ.*

By Rāmacandra.

Substance, country-made paper 9 × 4½ inches. Folia, 2. Lines, 17 on a page. Extent in ślokas, 82 Character, Nāgara. Date, Saṁvat 1823. Appearance, discoloured. Complete.

Colophon :—

इति दीपदानप्रयोगः समाप्तः ।

Post Colophon :—

संवत् १८२३ चैत्र कृष्ण १२ मन्दवारे आचार्य्यगोपालभट्टेन गोक्तनीग्रामे लिखितम् । स्वार्थं परार्थं च । श्रीवेणी-माधवार्पणमस्तु ॥

It begins :—

श्रीगणेशाय ।

पुरुषोत्तमपादाब्जभृङ्ग(र्पि)[यि]तमौलिना ।
लिख्यते रामचन्द्रेण दीपदानविधिः शुभः ॥

अथ दीपदानम् ।

तत्र शुद्धकालेषु मासाः २ । ५ । ८ । ९ । १० । ११ । १ । १२ ।
शुक्लपक्षः शुभः कृष्णोऽपि पञ्चम्यन्तः । वाराः १ । २ । ४ । ५ ।

2412.

10194. **काम्यदीपदानपद्धतिः** ।

Kāmyādīpadānapaddhatiḥ.

By Premanidhi Śarmā.

Substance, country-made paper. 10½ × 5 inches. Folia, 59. Lines, 9 on a page. Extent in ślokas, 1,260. Character, Nāgara. Date, Saṁvat 1831. Appearance, discoloured. Complete.

Beginning :—

अहो राजराजेश्वरस्य प्रसादादसावेव कल्पद्रुमः काम्यदीपः ।
स्वचेतोदरीशायिनां सत्फलानामवाप्यै सुदुःखाभितप्तैश्च सेव्यः ॥
दत्ते लौकिकदीपे ध्वान्तच्छेदे नृणां न सन्देहः ।
आपद्ध्वान्तच्छेदे वैद्यादस्मात् कुतः सोस्तु ॥

It ends : —

यस्योद्योतमती सती गुणवती मातापितोमापतिः
नाम प्रेमनिधि + + + + लभुः कूर्म्माचलो जन्मभूः ।
सूपास्यं कृतवीर्य्यजाच्युतपदं वाराणसीवासभूः
तत्राविश्य + + चकार स निजप्रेमागमां पद्धतिं ॥
श्रीमद्दीया कार्त्तवीर्य्यप्रसादात् प्रादुर्भूते प्रेमनिध्याख्यविप्रात् ।
ग्रन्थे भक्तव्रातसन्तोषकेस्मिन् इत्थं पूर्णं कामनादीपरत्नम् ॥

Colophon :—

इति श्रीमद्भागवकुलप्रसूतपद्मोपनामकप्रेमनिधिपुत्रनिर्म्मिता
काम्यदीपदानपद्धतिः संपूर्णा ॥

Then after three verses, we have the following Post Colophon Statement : -

संवत् १८३१ मौ० पौ० व० ५ गुरौ शुभमस्तु श्रीवाराणस्यां
लिखितोयं दीपदानप्रयोगः ॥

Already noticed in Nep. Cat., Vol. II, p. 141.

2413.

2050. **उभयतोमुखीदानविधिः ।**

Ubhayatomukhīdānavidhiḥ.

By Kamalākara.

Substance, country-made paper. $8\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 3, **Lines**, 11 on a page. Extent in ślokas, 70. Character, Nāgara. Appe**arance**, tolerable

It begins :—

श्रीरामलक्ष्मणपितरं नत्वा रामञ्च मातरम् ।
करोम्युभयतो मुख्या दानपद्धतिमुत्तमाम् ॥

आसन्नप्रसवां गां दृष्ट्वा पुण्यकालाद्यविचार्य्य तदैव स्नातः शुक्लाम्बरधरः प्राचमाहूय कृष्णजलाक्षतानादाय देशकालौ स्मृत्वा "मम एकविंशतिपुरुषैः सह वत्सगोमिथुनसमसंख्यकयुगावधि ब्रह्मलोकनिवासकामः श्रीविष्णुप्रीत्यर्थं यथाशक्त्यलङ्कृत-उभयतोमुखीगोदानमहं करिष्ये ।

Colophon :—

इति श्रीमन्नारायणभट्टपुत्रश्रीमल्लक्ष्मणभट्टसूनुरामभट्टानुजकमलाकरविरचिते उभयतोमुखी-दानविधिः ।

Post Colophon :—

इदं पुस्तकं भागवतोपनाम्ना यज्ञेश्वरेण लिखितं ॥

2414.

1941. **दानखण्डप्रयोगः** । *Dānakhaṇḍaprayogaḥ.*

By Bhaṭṭoja Dīkṣita.

For the MS. and the work see L., No. 1161.

There are two parts in this incomplete MS. The first comes to an end in leaf 25 and is written in bold beautiful Devanāgri of the eighteenth century. It ends abruptly in the middle of a verse on the section on Sivikādāna. The second part has 17 leaves.

2415.

2435. **गोदानविधिः** । *Godānavidhiḥ.*

With its Prayoga.

Substance, country-made paper. 6½ × 5 **inches. Folia, 10. Lines, 13** on a page. **Extent in** ślokas, 160. Character, Nāgara of the eighteenth century. **Appearance,** discoloured. Complete.

It begins as in our Catal. No. 2420.

It ends in leaf 2B where Godānaprayoga begins, which again ends in leaf 9A, इति सामान्यगोदानविधिः। Then commences a short work on Vaitarani Dāna, which ends in leaf 10A.

The Prayoga differs from that in Catal. No. 2420.

2416.

1948. **गोदानप्रयोगः।** *Godānaprayogaḥ.*

Substance, country-made paper. 9 × 4 inches. Folia, 3. Lines, 10 on a page Extent in ślokas, 50. Character, Nāgara of the eighteenth century. Complete

It begins :—

अथ स्वहितमिच्छता किं कर्त्तव्यमिति जिज्ञासायां धर्म्मेण पाप-मपनुदतीति वाक्यात् पापापनोदः कर्त्तव्यत्वेन प्राप्तः। तच्च धर्म्मो नाम वेदविहितोऽनुष्ठानविशेषः। स च यागः दानहोमादिरूपो-ऽनेकविधः। यागहोमादौ अग्निमाधे सपत्नीकस्यैवाधिकारित्वाद-पत्नीकेन जपदानाद्येव कर्त्तव्यं ... ...
देवांश्च याभिर्यजते ददाति चेति गोदानपरम्। ... ...
... ... स्कान्ददेवलहारीतवाक्यैः संवादात् गोदाने प्रमाणत्वेन ग्राह्यम्। ... ...

अथ सामग्री। सवत्सा गौः। वस्त्राणि दशसौवर्णनिर्म्मित-स्वर्णपट्टके। इत्यादि इत्यादि।

The Prayoga begins in the last but one line of leaf 1B.

It ends in leaf 3A. In leaf 3B, there is an extract from Kamalākara, part of which is given below :—

अमुकवेदान्तर्गतामुक-शाखाध्यायिने अमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रदे ; न ममेति उक्त्वा यज्ञसाधनेत्यादि मन्त्रं पठेदित्याह।

2417.

1857. **साधारणगोदानविधिः।** *Sādhāraṇagodānavidhiḥ.*

Substance, country-made paper. 8¼×3½ inches. Folia, 7. Lines, 9 on a page. Extent in ślokas, 160. Character, Nāgara. Date, Samvat 1829 and Saka 1694. Appearance, tolerable. Complete

On the subject of the gift of a cow for the spiritual advancement of the donor.

Beginning :—

अथ साधारणगोदानविधिरुच्यते ।

सर्व्वाघनाशनं पुण्यं सर्व्वकामार्थसिद्धिदम् ।

स्वर्गापवर्गदं चाथ वक्ष्ये गोदानमक्षरम् ॥

अथ यजमानोऽयनादिपुण्यकाले सुस्नातः प्रक्षालितपाणिपादः स्वाचान्तः सुस्निग्धायां भुमौ स्वासने समुपविश्य पवित्रे धृत्वा प्राणायम्य देवादीन् अभिवाद्य कृशतिलयवहस्तो देशकालौ स्मृत्वा सवत्सगोरोमसमसंख्यवर्षब्रह्मलोकनिवासकामः, सौवर्णप्रासादरत्नोज्ज्वलशय्यावरणसगोऽन्वितलोकप्राप्तिकामः, स्वर्गकामो, विष्णुप्रीतिकामो वा गोदानमहं प्रतिपादयिष्ये ।

End :—

दिव्यमूर्त्तिर्जगच्चक्षुर्दादशात्मदिवाकरः ।

कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥

यस्मात्त्वं कपिले पुण्या सर्व्वलोकस्य पावनी ।

प्रदत्ता सह सूर्य्येण मम मुक्तिप्रदा भव ॥

Col. :—

इति कपिलादानमन्त्रः । गोदानप्रयोगः समाप्तः ।

Post Col. :—

सं १८२९ प्र १६९४ का० क्ष० ८ चन्द्र । महाजनि वीरेश्वरस्य

2418.

1335. **गोदानविधिः** । *Godānavidhiḥ.*

Substance, country-made paper. 9 × 4 inches. Folia, 2 to 7. Lines, 6, 7 on a page. Extent in Ślokas, 70 Character, Nāgara. Date, Saṃvat 1869 and Saka 1734 Appearance, tolerable. Complete.

Colophon :—

इति श्रीगोदानविधिः ।

Post Colophon :—

शुभं भूयात् श्रीसंवत् १८६९ । शाके १७३४ फाल्गुन कृष्ण-चतुर्द्दशी चन्द्रवासरे पुस्तक समाप्तं ।

A religious treatise on the gift of a cow.

2419.

3273. **गोदानविधिः** *or* **कपिलादानविधिः** ।

Godānavidhiḥ or *Kapilādānavidhiḥ.*

Substance, country-made paper. 6½ × 4 inches. Folia, 17. Lines, 6 on a page. Extent in Ślokas, 102 Character, Nāgara of the nineteenth century. Appearance, fresh. Complete.

A religious treatise on the gift of a cow.

It begins :—

अथ गोदानविधिः ।

तत्र प्रथमं ब्राह्मण(वर्ण)[वरण]विधिः ॥

कपिलादाननिमित्तं ब्रह्मणे नमः ।

पादासनमस्तु । ततस्तं समभ्यर्च्च्य गन्धपुष्पादिभिः इदमाचमनीयं प्रतिगृह्यतां प्रतिगृह्णामि । इत्यादि ।

It ends :—

गावो मामुपतिष्ठन्तु हेमशृङ्ग्यः पयोमुचः ।

सुरभे ... ...

... ... इति विसृज्य नमस्कृत्य प्रणमेत् ।

Col. :—

इति कपिलादानविधिः ।

2420.

2191. गोदानविधिः । *Godānavidhih.*

Substance, country-made paper. 11½ × 5 inches. Folia, 4. Lines, 9 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, discoloured. Complete.

It begins :—

श्रीगणेशाय नमः । अथ गोदानविधिः ।

तत्र पात्रलक्षणम् गोलक्षणं च याज्ञवल्क्यः ।

यथाकथंचिद्दत्त्वा गां धेनुं वा धेनुमेव वा ।

अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥

गौरेकस्यैव दातव्या श्रोत्रियाय विपश्चितः ।

सो हि तारयते पूर्व्वान्सप्तसप्त च सप्त च (?) ॥

It ends :—

आत्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गृहान्मे तर्पयत गणान्मे तर्पयत सर्व्वगणं मा तर्पयत तर्पयत मा इति तर्पणम् ।

इति सामान्यगोदानविधिः । उपक्रमेषु० गोगौर्म्मिमाय हि क्षत्रवती वसुपत्नी आवहन् ब्राह्मणो ब्रह्मवर्चसी जायतां ॥ • ॥

श्रीविश्वेश्वरार्पणमस्तु ।

2421.

5051. शालग्रामदानपद्धतिः । *Sālagrāmadānapaddhatiḥ.*

Substance, country-made paper. 15 × 3½ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 80. Character, Bengali of the eighteenth century. Appearance, discoloured. Complete.

Beginning :—

अथ शालग्रामदानपद्धतिः ।

ताम्रपात्रस्थ-सुवर्णमेखलाद्यलङ्कृत शालग्रामशिलाभ्यो नमः ।

इति गन्धादिभिरभ्यर्च्य सम्प्रदानब्राह्मणञ्च पाद्यादिभिरभ्यर्च्य कृताञ्जलिः ।

शालग्रामशिला पूर्व्वं विष्णुदेहाद्विनिःसृता ।
पूजिता सर्व्वदेवैश्च गन्धाद्यैर्मुनिभिस्तथा ॥
नातः परतरं दानं पृथिव्यां विद्यते शुभम् ।
तस्मात् पात्रेषु पुण्याहे दद्याद्भक्तिविमत्सरः ॥, etc., etc.

2422.

5269. अन्नमेरुदानविधिः तत्पद्धतिश्च ।

Annamerudānavidhiḥ, with Paddhatiḥ.

Substance, country-made yellow paper. 13¼ × 3¼ inches. Folia, 3. Lines, 6 on a page. Character, Bengali of the nineteenth century. Appearance, fresh. Very nearly complete.

The MS. begins thus :—

श्रीदुर्गा ।

अथान्नमेरुदानविधिः मत्स्यसूक्ते ।

अन्नमेरोर्विधिं वक्ष्ये यत्कृत्वा न हि शोचनम् ।
राजराजेश्वरो भूत्वा स्वर्गलोके महीयते ॥
भोगान्ते ऽन्नस्य पदवीमियान्नास्त्यत्र संशयः ।

Annameru is a heap of cooked rice, of the height of the Yajamāṇa. A description of it is given below :—

स्वदेहदीर्घं कूटं स्यात् सूक्ष्मान्नस्य सुविस्तृतम् ।
सूक्ष्मवस्त्रावृतं कुर्य्यात् पताकाभिरलङ्कृतम् ॥
घृतदुग्धसितायुक्तं मधुपर्कफलान्वितम् ।
मुद्गमाषतिलैर्युक्तं दिक्षु गोधूमशोभितम् ॥
अथवा केवलाधीनं स्वदीर्घपरिमाणकम् ।

1B, इत्यन्नमेरुविधिः ।

अथ मत्स्यपुराणीय अन्नमेरुपद्धतिः ।

तत्र यज्ञीया देवताः सर्व्वाः स्युः कार्य्ये यज्ञकर्म्मणि ।

सायमावाहयेदिद्धान्नान्यत्रेति निमित्तकादिति वचनात् ॥

सायं मेरुमधिवास्य परदिने प्रातः स्नातः कृतनित्यक्रियः ... ... संकल्पं कुर्य्यात् । अद्य प्रोक्तविमुक्तत्वराजराजेश्वरत्वपूर्व्वक-स्वर्गलोकमहीयमानत्वकामः श्रीविष्णुप्रीतिकामो वा ब्राह्मणसम्प्रदानक-अन्नमेरुत्सर्गकर्म्माहं करिष्ये ।

The MS. breaks off abruptly at the end.

2423.

1886. महीयूहमठप्रतिश्रयदानानि ।

Mahigrhamathapratisrayadanani.

Substance, country-made paper. 9¼ × 4½ inches. Folia, 12. Lines, 9 on a page. Extent (in Slokas, 200. Character, Nāgara. Appearance, faded.

It begins :—

अथ महीदानं ।

कौर्म्मे—

"गोचर्म्ममात्रं भूखण्डमधिकं वा स्वशक्तितः ।

त्रिधा सदक्षिणां कृत्वा दत्वा शिवपुरं व्रजेत् ।" /2

त्रिधैकसुवर्णरूपा दक्षिणा त्रिधेत्यर्थः ।

Colophons :—

2A, इति महीदानविधिः; 12A, इति गृहदानप्रयोगः

12B, इति मठदानं (खान्दोक्तम्), इति प्रतिश्रयदानम् ।

The work ends :—

दीनानाथजनार्थाय वर्णकं न कृतं भवेत् ।

प्रतिश्रयो धर्म्मशाला । इति प्रतिश्रयदानम् ॥

2424.

8941. **कलसप्रतिष्ठा ।** *Kalasapratiṣṭhā.*

Substance, country-made paper 9 × 4¼ inches. Folia, 16. Lines, 7 on a page. Extent in ślokas, 224. Character, modern Nāgara. Date, Śaka 1755. Appearance, fresh. Complete.

Beginning :--

अथ कलसप्रतिष्ठा ॐ भूरसि इत्यादि ॥

Complete in 16 leaves

An elaborate process of making a gift of a potful of water to the Brāhmaṇas.

Post Colophon :—

शाके १७५५ कार्त्तिके मासे शुभे शुक्लपक्षे तिथौ षष्ठ्यां शनि-वासरे लि० मिदं पुस्तकं ईश्वरीप्रसादपाठकेन ।

2425.

9875. **शय्यादानविधिः ।** *Śayyādānavidhiḥ.*

Substance, country-made paper. 11 × 5 inches. Folia, 5. Lines, 8 on a page. Extent in ślokas, 72. Character, Nāgara Appearance, fresh. Complete.

On the gift of a bedding in connection with a funeral rite.

Beginning :—

अथ शुद्धिश्राद्धशय्यादानविधिः ।

ततः सपत्नीको यजमानो गणपति षोडशमातृनवग्रहपूजनं, etc.

Colophon :—

इति शय्यादानविधिः ।

Post Colophon :—

शुभं भूयात् श्रीरामः ।

2425A.

777. **एकाम्रचन्द्रिका** । *Ekamracandrika.*

Being a Guide to Pilgrims visiting Bhuvaneswara.

Character, Uriyā

A palm-leaf manuscript fully described in L. 1560.

2426.

3554. **मुक्तिचिन्तामणिः** । *Mukticintāmaṇiḥ.*

By Puruṣottama Gajapati.

Substance, country-made paper. 15 × 5¼ inches. Folia, 25, of which the first leaf is missing. Lines, 10 on a page. Extent in ślokas, 750. Character, Bengali. Date, Saka 1697. Appearance, fresh

Colophon :

इति मुक्तिचिन्तामणौ प्रसादकाण्डः समाप्तः ।

Post Colophon :—

शकाब्दाः १६९७ ।

पुस्तकमिदं श्रीहरिरामदेवशर्म्मणः स्वात्तरञ्च । श्रीश्रीजगन्नाथ "श्रीश्रीबलराम "

दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।, etc., etc., etc.

It refers to the duties of a pilgrim at Puri. Published by Mahāmahopādhyāya Sadāśiva Miśra of Puri.

2427.

8681. **तीर्थरत्नाकरः** । *Tīrtharatnākaraḥ.*

By Rāmakṛṣṇa.

Substance, country-made paper. 9½ × 4½ inches. Folia, 69. No. 2, missing. Lines, 10 on a page. Extent in ślokas, 1,700. Character, Nāgara. Old. Fresh Incomplete.

Beginning :—

श्रीगणेशाय नमः ।

आनन्दाश्वितपादाब्जमिलन्मौला, etc.

See L. 2542.

2428.

10034. **प्रयागमाहात्म्यम् ।** *Prayāgamāhātmyam.*

A part of Tīrtharatnākara, otherwise called Rāmaprasād.

By Rāmakṛṣṇa Bhaṭṭa, son of Mādhava.

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 18. Lines, 9 to 11 on a page. Extent in ślokas, 450. Character, Nāgara of the eighteenth century. Appearance, discoloured. Complete.

Colophon :—

इति श्रीमत्पराशरगोत्रसकलशास्त्रविशारदमाधवात्मजराम-कृष्णभट्टविरचिते श्रीरामप्रसादाख्ये तीर्थरत्नाकरे प्रयागमाहात्म्यं ॥

Beginning :—

श्रीगणेशाय नमः । तत्र अतिः ॥

सितासिते सरिते यत्र संगते तत्र × × × दिवमुत्पतन्ति ।
ये वै तन्वन्ति सृजन्ति धीरास्ते वै जनासो अमृतं भजंते ॥

Tīrtharatnākara is by Rāmakṛṣṇa of the Parāśara Gotra, son of Mādhava, son of Nārāyaṇa, son of Bhairava (who was a *protege* of Śeṣavaṃśa), son of Jānārdana, son of Nuṭa Śarmā, son of Śivadāsa. [See L. 2542.]

Rāmakṛṣṇa compiled Pratāpamārttaṇḍa under the patronage of Pratāpa Rudra Gajapati and carried the title of Paṇḍita-Śiromaṇi from Balabhadra, the Guru of the Rājā.

2429.

144. **द्वादशयात्राप्रयोगप्रमाणम् ।**

Dvādaśayātrāprayogapramāṇam.

By Vidyānivāsa.

This manuscript has been described by Dr. Rājendralāla Mittra under No. 413, under the title of दोलारोहणपद्धतिः ।

Contents :—

(1) स्नानमहोत्सवविधिः, 11A. (2) गुण्डिकाख्ययात्राविधिः, or रथयात्राविधिः, ending in 15B. (3) शयनमहोत्सवविधिः, in 16B. (4) दक्षिणायनोत्सवविधिः, in 17A. (5) पार्श्वपरिवर्त्तनविधिः, in 17B. (6) उत्थानमहोत्सवविधिः, in 19A .(7) प्रावरणोत्सवविधिः, in 20B. (8) पुष्याभिषेकविधिः, in 21B. (9) नवयौवनोत्सवविधिः, in 23A. (10) दोलयात्रा, in 28B. (11) मदनभञ्जनयात्रा, in 29B. (12) अक्षयतृतीयायां चन्दनयात्राविधिः, in 31B.

Col. in 31B :—

इति विद्यानिवासकृतद्वादशयात्राप्रयोगप्रमाणं समाप्तम् ।

द्वादशयात्रातिरिक्त-रामनवमीयात्रा श्रीपञ्चमीयात्रा-रामयात्रा--नूतनशरीरदर्शनयात्रा--अक्षयमानन्तमूर्त्तिदर्शनयात्रादि प्रयोगपद्धतौ यथाविध्यनुसन्धेयम् ।

Then commences दोलारोहणपद्धतिः ।

It deals with all the twelve festivals in twelve months of the year, connected with the image of Jagannātha at Purī, and refers all other festivals to Prayoga-paddhati. It further treats, particularly in the last chapter, of दोलारोहण or the placing of the image in a swing. It ends in leaf 31. The authorship of the Post Colophon Statements is not given.

Vidyānivāsa is the son of Vidyāvācaspatī and the father of Viśvanātha Tārkapañcānana, the author of the Bhāṣāparīccheda.

2430.

1770. **त्रिस्थलीसेतुः ।** *Tristhalīsetuḥ.*

By Nārāyaṇa Bhaṭṭa, son of Rāmeśvara Bhaṭṭa.

Substance, country-made paper. 8¼ × 4 inches. **Folia**, 88. **Lines**, 11, 12 on a page. **Extent in ślokas**, 2,500. **Character**, Nāgara. **Date**, Samvat 1738. **Appearance**, tolerable.

Post Col. :—

संवत् १७३८ का भाद्र वा सुदि १४ ।

Tristhalīsetu is a comprehensive treatise on pilgrimage, by Nārāyaṇa Bhaṭṭa, son of Rāmeśvara Bhaṭṭa. Divided into praghaṭṭakas.

The present manuscript contains the first part, called सामान्यप्रघट्टकः, the object of which is thus given in the last introductory verse :—

साधारणस्तीर्थविधिः प्रथमं सम्यगुच्यते ।
प्रयागादित्रयविधिः पश्चादित्यत्र संग्रहः ॥

For a description of this part see I.O. Catal., No. 1719.

The first chapter gives the subject of the work a general treatment, the subsequent chapters treating, in every detail, of particular tirthas. See L. 797, where an analysis of this section is given.

The verses, giving an account of the author's family, are omitted in the present manuscript.

On the title-page of the manuscript, there are two names as the former owners :—

भट्टरामदेवसुत-रङ्गनाथस्येदं पुस्तकं ।

In a later hand :—

पुस्तकमिदं दग्नपुत्रविष्णोः
त्रिस्थलीमेतौ सामान्यप्रघट्टकः ।

2431.

2701. *The Same.*

(प्रयागप्रकरणम्)।

By Nārāyaṇa Bhaṭṭa, son of Rāmeśvara Bhaṭṭa.

Substance, country-made paper. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 36. Lines, 12 on a page. Character, Nāgara. Date, Saṃvat 1680. Appearance, old, discoloured and corroded. Complete.

Colophon :—

इति भट्टरामेश्वरसूनुभट्टनारायणविरचिते त्रिस्थलीसेतौ प्रयागप्रकरणं समाप्तम्। इतः परं काशीप्रकरणं भविष्यति।

Post Col. :—

संवत् १९८० शके १५४५ आङ्गिरस संवत्सरे पौषशुक्ल प्रतिपदि शुक्रे गोविन्दभट्ट आयाचितात्मजनीलकण्ठेनेदं पुस्तकं लिखितं स्वार्थं परार्थं च।

Often noticed.

2432.

8848. *The Same.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 59. Lines, 8, 9 on a page. Character, Nāgara of the eighteenth century. Appearance, old and discoloured. Complete.

Complete in 59 leaves.

The Last Col. runs thus :—

इति भट्टरामेश्वरसूनुभट्टनारायणविरचिते त्रिस्थलीसेतौ प्रयाग-प्रकरणं समाप्तं।

Printed at Benares.

2433.

1771. *The Same.*

Substance, country-made paper. 9 × 4¼ inches. Folia, 47. Lines, 11, 12 on a page. Extent in ślokas, 700. Character, Nāgara. Appearance, old. Complete.

The second part of Tristhalisetu, for description of which see L. 1115 and I.O. Catal., No. 1721.

2434.

819. *The Same.*

Substance, country-made yellow paper. 17½ × 4 inches. Folia, 27. Lines, 8 on a page. Extent in ślokas, 1,200. Character, Bengali. Fair writing. Appearance, fresh.

A part of Tristhalīsetu by Nārāyaṇa Bhaṭṭa, son of Rāmeśvara Bhaṭṭa; it relates to pilgrimage to Gayā.

It begins thus :—

श्रीगणेशाय नमः ।

वादीभयुक्तिकुम्भस्थलदलनाङ्कुशमाननखगर्भात् ।
विकिरत्प्रमेयमुक्ताविद्यावनकेशरीगुरुर्जयति ॥
नत्वाखिलोद्धारधुरन्धरं परं
गदाधरं बुद्धिविशुद्धिसाधकम् ।
सन्देहमुत्सार्य्य विचार्य्य सादरम्
मया गयाकार्य्यमुदीर्य्यतेऽधुना ॥
सुतादिकर्त्तृकं यस्यां श्राद्धं श्रद्धासमेधितं ।
पित्राद्युद्दिश्यफलदं सा गया यागतोऽधिका ॥ इत्यादि ॥

End :—

एवं गयाक्षेत्रे निर्व्यूढे ततो निर्गमनकाले गदाधरपूजा-स्तुति-प्रार्थनाः कार्य्याः । स्तुत्वा संप्रार्थयेदेवं आदिदेवं गदाधरं ।
इत्यग्निपुराणवचनात् । स्तुतिप्रार्थनाप्रयोगो वक्ष्यते ॥

Col. :—

इति श्रीमद्भट्टरामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थली-सेतौ गयाक्षेत्रं समाप्तं ॥

2435.

1774. *The Same.*

(गयाप्रकरणम्) ।

Substance, country-made paper. $9\frac{3}{4} \times 3\frac{1}{4}$ inches. Folia, 49. Lines, 11 on a page. Extent in ślokas, 700. Character, Nāgara. Appearance, old. Complete.

For a description of the *Gayā section* of the work, see L. 1599. The Library numbers 1770 to 1772 and 1774 make the work complete. See above and below.

The section in the present manuscript ends thus :—

साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मया गयां समासाद्य पितृणां निष्कृतिः कृता ॥

Col :—

इति श्रीमद्भट्टरामेश्वरात्मज-श्रीनारायणभट्टविरचिते त्रिस्थली-
सेतौ गयाप्रकरणे गयाकार्य्यानुष्ठितिः ॥

Post Col. :

समाप्तोऽयं ग्रन्थः ।

वायुपुराणे ।

मीने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ।
दुर्ल्लभं त्रिषु लोकेषु गयायां पिण्डपातनम् ॥ इति ॥

वायुपुराणेपि स्तुतिद्वयम् ।

गदाधरं विगलितकालकल्मषं
गयागतं विदितगुणं गुणातिगम् ।
मुहागतं गिरिवरगौरगेहगम्
सुरार्चितं वरदमहं नमामि तम् ॥
अतश्रियं त्रिदशगुणादिषु श्रियं
यशः श्रियं + + + +
कलागतं कलिमलमर्दनश्रियं
दृशावृतं पथिदृशगादृशश्रियम् ॥

Some verses more on Gadādhara.

2436.

1772. *The Same.*

(काशीप्रकरणम्) ।

Substance, country-made paper. 10 × 4 inches. Folia, 236. Lines, 9 on a page. Extent in slokas, 3,800. Character, Nāgara. Date, Samvat 1848. Appearance, fresh. Complete.

Beginning :—

श्रीगणेशाय नमः । अथ काशीप्रकरणम् ।

भवानीं प्रणं न [प्रणं]करौ नत्वा भट्टरामेश्वरात्मजः ।
भट्टनारायणः काशीं विविनक्ति सदुक्तिभिः ॥

तत्र माहात्म्यज्ञानस्य प्रवृत्त्यौपयिकत्वेन तत्रावश्यत्वात्तदेव प्रथमं निरूप्यते इत्यादि ।

Post Colophon Statement :—

शुभमस्तु ॥ संवत् १८४८ ॥ दुंदुभीसंवच्छरे ॥ फाल्गुन कृष्ण-त्रयोदशी ॥ १३ ॥ रविदिने सम्पूर्णोऽयम् ॥

For a description of the present section of the work, see L. 2268.

2437.

10182. **त्रिस्थलीसेतुसारसंग्रहः ।**

Tristhalīsetusārasaṃgrahaḥ.

Being an abridgmeat of Nārāyaṇa Bhaṭṭa's Tristhalīsetu.

By Bhaṭṭoji Dīkṣita.

Substance, country-made paper. 12 × 6 inches. Folia, 18. Lines, 12 on a page. Extent in ślokas, 540. Character, Nāgara. Date, Saṃvat 1942. Appearance, fresh. Complete.

Colophon :—

इति श्रीभट्टोजीदीक्षितविरचितत्रिस्थलीसेतुसारसंग्रहः समाप्तः ।

Post Col. :—

संवत् १९४२ जेष्ठशुदि ७ बुधवासरे ।

In a later hand :—

लिखवाया विधकीलागाकहतु कासमजेश्वराभमें पत्ता यत्र ५०० श्लोक ।

Beginning :—

साधारणतीर्थविधिः प्रथमं सम्यगुच्यते ।
प्रयागादित्रयविधिः पश्चादित्यत्र संग्रहः ॥
तत्र या याः काश्चित्तीर्थयात्रा मुनीन्द्रैः
कृताः प्रयुक्ता अनुमोदिताश्च ।
ता ब्रह्मचारी विधिवत् करोति
सुसंयतो गुरुणा सुसंनियुक्तः ॥ इति ॥

End :—

भविष्येपि ।
गङ्गासीमां न लङ्घन्ति सर्व्वपापान्यशेषतः ।
दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः॥
एकयोजनविस्तीर्णा दिक्षु सीमातटद्वयमिति ।
अत्र गुरुचरणाः ॥ गर्भे प्रतिग्रहनिषेधः प्रसिद्धनदीषु प्रसिद्धतरगण्डक्यादि-
तीरेपि गङ्गायान्तु क्षेत्रेऽपीति श्रिष्टाः ।

2438.

5489. *The Same.*

Substance, country-made paper. 10 × 4½ inches. Folia, 16. Lines, 9 on a page. Character, Nāgara of the early nineteenth century. Appearance, discoloured.

Beginning :—

श्रीगणेशाय नमः ।

काशि[शी]संज्ञेभ्यो मोक्षमिच्छां प्रयच्छतीत्यादि, etc.

Pilgrim's duties in the three sacred places, Prayāga, Kāśī and Gayā. The present manuscript contains the sections on Kāśī and Gayā. For the beginning of the work, see Burnell, p. 137A.

14A, इति काशीप्रकरणम् । अथ गयाप्रकरणम् ।

Last Colophon :—

इति [illegible]

2439.

1014. **कुरुक्षेत्ररत्नाकरः ।** *Kurukṣettraratnākarah.*

By Mahāmahopādhyāya Saṅkara.

Substance, country-made paper. 11 × 5 inches. Folia, '96. Lines, 11, 12 on a page. Extent in ślokas, 2,600. Character, Nāgara - Date, Samvat 1818. Appearance, tolerable. Complete.

A compilation from Manu, Yājñavalkya, Mahabharata and from various Purāṇas, bearing on the shrines in the land of Kurukṣettra.

The author Śaṅkara was a native of Mithilā. He was a much travelled man and visited the shrines for himself, as stated in verse 3

Beginning:

स्वस्ति श्रीगणेशाय नमः ।

संसेवितभृगुतुङ्गं विद्योतितवेदवेदाङ्गं ।

परिनर्त्तितभवरंगं (मनसि भजंगं)

[मनसिज भङ्ग] समाश्रये ऽलिङ्गं ॥ १ ॥

सत्त्वादिस्थैरगणितगुणैर्ईन्त विश्वं प्रसूय

व्यक्तं धत्ते प्रहसनकरीं या कुमारीति संज्ञां ।

मोहध्वान्तप्रसरविरतिर्विश्वमूर्त्तिः समन्तात्

[या]द्या प्रकृतिः स्फुरतु मम सा दीपवद्देहगेहे ॥ २ ॥

अस्ति श्रीमिथिलाभिधो ऽवनितले देशः सतामाश्रयः

प्रौलेशो गिरिजापते रजनि या यत्रास्ति सा वागवती ।

तस्मिन् प्रकर इत्यसौ निगदितः प्रौवं पदं संश्रय-

स्तीर्थान्यत्तिपथस्थितानि विदधे देशादिनिर्गत्य यः ॥ ३ ॥

प्रमाणञ्च प्रयोगं च यथाशास्त्रं यथामति ।

कुरुक्षेत्रीयतीर्थानां निबन्धाति सतां मुदे ॥ ४ ॥

न च वयमधिकुर्म्मः कर्म्मणा प्राक्तनेन

प्रपिहितगुणभावादिस्मृतस्वस्वरूपाः ।

तदपि सङ्गजसुद्वस्वान्तजातान्नमामः
कथमपि भवतास्मिन् येन सार्थप्रयत्नः ॥
न गुणाः क्वापि गण्यन्ते सत्त्वीकारे हि गौरवं ।
पीतिमा गुणसाम्येऽपि हरिद्राखर्णयोरिव ॥

The work opens with a dissertation on the Social System, Karma and Mokṣa or Liberation; and it is with the object of Mokṣa that pilgrimage is to be undertaken, which is included in *Niyama*, one of the means for the attainment of *Mokṣa*.

13B, कुरुक्षेत्रान्तर्गतब्रह्मावर्त्तदेशप्रशंसा. 17A, कौशिक्यां सङ्गमतीर्थम्: 17B, प्रालूकिन्यां दशाश्वमेधतीर्थम्; 18A, पूर्व्वरेखातीर्थयात्रा; 18B, पञ्च नदकोटितीर्थं वामनतीर्थं; 19B, वाराहतीर्थम्, औदग्रामोत्तरभागे॥ अथ जयन्त्यां सोमितीर्थम्; 20A, मुञ्जवटतीर्थम्; 21A, पञ्चरुद्रतीर्थम्; 21B, वंशकमूलकतीर्थम्, कायशोधनतीर्थम्, 22A, लोकोद्वरतीर्थम, श्रीतीर्थम, कापिलतीर्थम्, 22B, सूर्य्यतीर्थम्, गृहागाग्रामे पश्चिमभागे गन्धभवनतीर्थे; 23A, सान्धिनिग्रामे पूर्व्वदिशि संस्थलीग्रामे देवीतीर्थे, वङ्करग्रामे॥ ततः सरस्वत्यामरह्रदयक्षद्वारपालकतीर्थम्; 24A, ककरलाग्रामे कामेश्वरतीर्थे; 24B, वृषमोचनतीर्थम्, मानुषग्रामे मानुषतीर्थम्: 27A, सौल्हाग्रामे सप्तर्षिकुण्डापरनामकं ब्रह्मोद्भव(ग)तीर्थम्; 28B, कपिस्थले रुद्रकेदारतीर्थम्; 29A, शुक्रावर्त्ततीर्थम्; 29B, सर्व्वदेवतीर्थम्, मिश्रकतीर्थम्; 30A, हिरण्यवत्यपरनामकं कौशिकीदृषद्वत्योः सङ्गमः, मधुवनम्, व्यासवने मनोजवतीर्थम्; 30B, व्यासस्थली, अर्हतीर्थम्; 31A, नृगधूममन्दाकिनीगङ्गातीर्थम्, तत्रैव कोटितीर्थम्; 31B, ज्येष्ठाश्रमतीर्थम्; 32A, सूर्य्यतीर्थम्; 32B, पवनह्रदतीर्थम्, अमरह्रदापरनामकममृततीर्थम्; 33A, शालिहोत्रतीर्थम्, नैमिषकुञ्जतीर्थम्; 34A, वेदवतीतीर्थम्, ब्रह्मतीर्थम्, सप्तसारस्वतं तीर्थम्; 36B, भार्गवतीर्थम्, अग्नितीर्थम्, कपालमोचनतीर्थम्, विश्वामित्रतीर्थम्; 37A, सर्व्वतीर्थोत्तमं पृथूदकतीर्थम्; 38A, पृथूदके ब्रह्मयोनितीर्थम्; 38B, अथ घृतक्रतुत्वेन प्रसिद्धं वकाश्रमापरनामकमवकीर्णतीर्थम्; 41A, अवकीर्णमध्ये बृहस्पतितीर्थम्, कपिलतीर्थत्वेन प्रसिद्धं पापान्तकतीर्थम्, अथ सर्पिंवतीर्थम्;

41B, मधुस्रवातीर्थम्, प्राच्यां विश्वामित्राश्रमे वशिष्ठप्रवाहतीर्थम्; 43A, सरस्वत्यरुणासङ्गमे तीर्थम्; 45B, द्वितीयसमुद्रतीर्थम्, सरस्वत्यां सोमतीर्थम्, घृतकापरनामकसाहस्राकतीर्थम्; 46A, अथ रेणुकातीर्थम्, विमोचनातीर्थम्; 46B, प्राच्यां सरस्वत्यां पृथूदकपूर्व्वावधिभूतं सन्निहितसरःपश्चिमावधिभूतमौजसं-तीर्थम्; 55B, अथ पञ्चवटतीर्थम्; 56A, औजसपूर्व्वे भागे कुरुतीर्थम्, स्थाणु-द्वारसर्गद्वारतीर्थम्, नरकतीर्थम्; 57A, अथनरकदक्षिणभागे विश्वेश्वरस्थानम्, अथानरकपश्चिमभागे रुद्रपत्नीस्थानम्, अथानरकोत्तरदिग्भि पद्मनाभस्थानम्, अथ सर्व्वदेवतीर्थम्; 57B, ततोऽस्तिपुरं तीर्थम्, अथ पावनतीर्थम्; 58A, अथ आपगातीर्थम्, गङ्गाह्रदतीर्थम्, सरस्वत्यामग्नितीर्थम्; 58B, स्थाणुवटतीर्थ-निकटे ब्रह्मयोनितीर्थम्; कुबेरतीर्थम्; 59A, विहारनामक मदनतीर्थम्; 59B, ब्रह्मतीर्थम्; 60A, स्थाणुलिङ्गतीर्थम्; 64A, कुमारेश्वरोत्तरभागे विभीषणेश्वरलिङ्गम्, त्रिपुरेश्वरलिङ्गम्; 65A, अथ वटसमीपे वटेश्वरलिङ्गम्; 65B, हस्तिपादेश्वरदक्षिणे हारीतेश्वरलिङ्गम्; 66A, आदित्येश्वरपूर्व्वभागे चित्राङ्गदेश्वरलिङ्गम्, अथ रम्भेश्वरलिङ्गम्, 66B, अथतदक्षिणे शुक्लीश्वरलिङ्गम्; 67A, अथात्र प्रतिष्ठितानि चतुर्म्मुखानि चत्वारि लिङ्गानि; 95B, गङ्गाह्रदतीर्थम्।

It ends :—

आददे च पदवीमुदयद्भि पांच रात्रिरात्रचरिश्रमयद्भिः। (?)

प्रोधनीयमिदमस्ति + + सर्व्वथैव भजनं गमयद्भिः। (?)

The codex is very corrupt but unique.

Col. :—

इति श्रीमद्रामहोपाध्यायश्रीगङ्गारविरचितः कुरुक्षेत्ररत्नाकरः समाप्तः॥

Post Col. :—

संवत् १८१८ वैशाख कृष्णप्रतिपदायां सोमे मुद्गलगोत्रे दुलीभट्टये कृष्णात्मजहरसुखसंपठनार्थं लेखनीयं कुरुक्षेत्रीये स्थानेश्वरमध्ये॥ शुभम्।

On the obverse of the last leaf, there is a quotation from the Mātsyapurāṇa.

2440.

6037. **तीर्थमाहात्म्यम्** । *Tīrthamāhatmyam.*

Substance, country-made paper. 12 × 5| inches. Character, Nāgara. Appearance, fresh.

There are four batches of leaves—the first consisting of 33, the second of 16, the 3rd of 13 and the fourth of 44, all written in different hands.

The last two batches are numbered, both on the top and at the bottom, in a later hand. The latter numbering begins from 17 and continues through both the parts, being meant to connect them with the second batch ending in the 16th leaf, although there is no connection whatever between the 16th and the 17th leaves.

The first batch is marked in a later hand श्रे. तौ, while others except the last leaf of the last batch are not so marked. But they all relate to pilgrimage.

The obverse side of the first leaf of the first batch and the reverse of the last leaf of the last batch bear the signature of Sarvavidyanidhāna Kavīndrācārya Sarasvatī: श्रीसर्व्वविद्यानिधानकवीन्द्राचार्य्यसरस्वतीनां तीर्थमहात्म्यपुस्तकम्।

The first and the last batches of the leaves look much older than the two intermediate ones.

Kavīndrācārya is well-known, through whose intervention Shāh Jāhān abolished the pilgrim-tax He possessed a good Library, all the MSS. of which bore his signature.

It begins :—

ॐ नमो गणेशाय नमः। ॐ नमः सरस्वत्यै।

येषु स्नानमशेषपापशमनं दानञ्च वाञ्छास्पदम्।

तादृक् पुण्यमगण्यमाप्नु तनुते येनानवैः (?) स्पर्द्धते।

यन्नामस्मरणादितोऽपि दुरितोद्दामेभदानच्युतिः ।
लोकानां श्रितहेतवे स्फुटतरं तीर्थानि तानि ब्रुवे ॥
तीर्थस्वरूपं तीर्थानां पुरुषार्थनिमित्तता ।
तीर्थकीर्त्तनमाहात्म्यं विभागाश्चापि + + + ॥
तीर्थयात्राधिकारश्च यात्राङ्गानुष्ठितिस्तथा
यात्रायानकथागम्यागम्यदेशादिकीर्त्तनम् ॥
कालशुद्धिश्च × × × यात्राङ्गानुष्ठितिस्तथा ।
तीर्थप्राप्तिदिने कृत्यं तीर्थप्राप्तावुपोषणम् ॥
मुण्डनञ्च तथा तीर्थस्नानं तीर्थे च तर्पणम् ।
तीर्थश्राद्धञ्च तीर्थेषु देवतादर्शनादिकम् ॥
प्रतिग्रहनिषेधादिस्तीर्थेऽनुष्ठानपद्धतिः ।
जम्बूद्वीपस्य वर्षाणां अद्रीणाञ्चापि कीर्त्तनम् ॥
उद्देशः सर्व्वतीर्थानां नदीनाञ्चापि तत्फलम् ।
सामान्यतः समुद्दिष्टमथ काशीविवेचनम् ॥
कीर्त्यते यमुना चापि नर्म्मदा तदनन्तरम् ।
ततो गयाविधिः सम्यक् मन्दारमहिमा तथा ॥
अथ कोकामुखविधिः कुरुक्षेत्रफलं ततः ।
पृथूदकादिमाहात्म्यं सरस्वत्याः फलं ततः ॥
अथ प्रभासमाहात्म्यं महिमा पुष्करस्य च ।
स्तुतस्वामिस्तुतिकथा वदरीवर्णनं ततः ॥
लोहार्गलस्य माहात्म्यं केदारमहिमा महान् ।
शालग्रामगुणग्रामो नैमिषोन्मेषणं ततः ॥
इन्द्रप्रस्थस्य माहात्म्यमयोध्यामहिमोदयः ।
मथुरामहिमा श्लाघ्या चित्रकूटानुकीर्त्तनम् ॥
कालञ्जरस्य माहात्म्यं पट्टङ्गेश्वरपुरं ततः ।
अवन्ती द्वारकातापीपौरोमागरसङ्गमः ॥
पयोष्णीस्नानमहिमा महीगोदावरी ततः ।
सप्तगोदावरीमाहात्म्यं गोकर्णमहिमा महान् ॥

सप्तकोटीश्वरकथा(सतु)[सेतु]बन्धफलश्रुतिः ।
पुरुषोत्तममाहात्म्यमेकाम्रगुणगुम्फनम् ॥
अथ कोणार्कमाहात्म्यं विरजक्षेत्रनिर्णयः ।
कालरूपस्य (कामरूपस्य (?)) महिमा कपोतीयानकीर्त्तनम् ॥
ब्रह्मपत्तनदग्ला(ध्या)[घा]भन्यौषगुणजल्पनम् ।
ततो नानातीर्थफलं फलम् पृथ्विप्रदक्षिणा ॥ ?
+ + + + + अथ तीर्थस्वरूपम् महाभारते ।

The first part is taken up with the preliminaries before starting on pilgrimage.

Part II.

7A, इति गयाप्रकरणं समाप्तम्, अथ मन्दारमाहात्म्यम्; 7B, अथ कोकामुखमाहात्म्यम्; 8A, अथ कुरुक्षेत्रमाहात्म्यम्; 16A, अथ गङ्गाह्रद-माहात्म्यम्; 16B, अथ सोमतीर्थं, अथ मुञ्जवटः ।

Part III.

4A, अथ पुष्करमाहात्म्यम्: 6A, बदरिकाश्रममाहात्म्यम्; 6B, अथ लोहार्गलमाहात्म्यम्; 7A, अथ केदारमाहात्म्यम्; 8B, अथ नैमिषमाहात्म्यम्; 9A, अथ इन्द्रप्रस्थमाहात्म्यम्; 11A, अथ सरयूमाहात्म्यम्; 11B, अथ सरयू-घर्घरसङ्गमः; 12A, अथ मथुरामाहात्म्यम् ।

It quotes Hemādri :—

2B, तीर्थहेमाद्रौ ।

Part IV.

5A, अथ मथुरावासमाहात्म्यम्; 10A, अथ कालञ्जरमाहात्म्यम्, अथ भद्रवेरमाहात्म्यम्, अथ उज्जयिनीमाहात्म्यम्: 11A, द्वारकामाहात्म्यम्; 12A, अथ गोपीचन्दनमाहात्म्यम्; 12B, अथ तत्रैव गोमतीमाहात्म्यम्; 13A, अथ चक्रतीर्थमाहात्म्यम्; 13B, अथ गोमतीसङ्गममाहात्म्यम्; 15B, अथ सप्तकुण्डानि, अथ पिण्डारकमाहात्म्यम्; 16A, अथ मही-माहात्म्यम्; 17A, अथ पयोष्णीमाहात्म्यम्: 17B, अथ गोदावरीमाहात्म्यम्; 18B,

वराहतीर्थम्; 19B, अथ कावेरीमाहात्म्यम्, अथ श्रीशैलमाहात्म्यम्, अथ सह्यामलकमाहात्म्यम्: 20B, अथ गोकर्णमाहात्म्यम्, अथ सप्तकोटीश्वर-माहात्म्यम्; 39A, अथ कोणार्कविधिः; 39B, अथ विरजक्षेत्रम्; 41B, अथ नानातीर्थमाहात्म्यम्; 44A, अथ पृथिवीप्रदक्षिणविधिः, अथ महापथ-प्रस्थानविधिः।

It ends:—

तीर्थानां महिमा महानभिहितो योसौ हितो जन्मिनां
तत्तत्कर्म्मविधिर्महाफलनिधिस्तेष्वत्र निर्वर्णितः।
विद्वन्मानस[हंस]हर्षणकृता तन्मेऽमुना कर्म्मणा
पुण्यस्तम्बकरिर्भवार्णवतरिर्देवो हरिः प्रीयताम्॥

There is no colophon.

2441.

5469. **गयाकृत्यानुष्ठानपद्धतिः।**

Gayākṛtyānuṣṭhānapaddhatiḥ.

By Raghunātha Bhaṭṭa.

Substance, country-made paper. 11×5 inches. Folia, 20. Lines, 13 on a page. Extent in ślokas, 500. Character, Nāgara of the eighteenth century. Appearance, old and discoloured. Complete.

Beginning:—

श्रीगणेशाय नमः।

गदाधरं प्रणाम्याथ विष्ण्वाद्याः प(द)[ष]देवताः।
रघुनाथो गयाकृत्यं यात्रारम्भादि भाषते॥

तत्र तावत् प्रमाणभूतं वायुपुराणं प्रदर्श्यते।

End:—

इति।

मूलोपन्यासनासारी रघुनाथेन निर्म्मितः
गयानुष्ठेयसन्दोहप्रयोगः क्रमसंग्रहः॥
प्रीयन्तां पितरस्तेन देवाद्यादिगदाधरः।
क्षन्तव्यश्च प्रमादस्तैर्यः कश्चिदिह मे भवेत्॥

Col. :—

इति श्रीमद्भूमाधवात्मज-भट्टरघुनाथज्ञता गयाश्राद्धानुष्ठान-पद्धतिः सम्पूर्णा ।

Post Colophon Statement :—

अज्ञानदोषान्मतिविभ्रमाच्च
यत्किञ्चिदूनं लिखितं मयेह ।
तत्सर्व्वमार्य्यैः परिशोधनीयं
प्रायेण मुह्यन्ति हि ये लिखन्ति ॥

शुभमस्तु सर्व्वजगतः ॥

2442.

4172. **तीर्थकल्पलता** । *Tirthakalpalata.*

By Gokuladeva, son of Anantadeva.

Substance, country-made paper. 11 × 5½ inches. Folia, 26 Lines, 11 on a page. Extent in ślokas, 800. Character, Nāgara of the eighteenth century. Appearance, old. The last page effaced. Complete.

Beginning :—

श्रीगणेशाय नमः ।

अथ तीर्थफलतारतम्ये कारणमाह पद्मजः ।

तीर्थं प्राप्य प्रयांमीत स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राकृतेन तु ॥

प्रसङ्गेन सेवया वाणिज्यादिना वेत्यर्थः । यत्तु पैठीनसिनाप्युक्तम् ।

अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ।
षोड़शांशं स लभते यः परार्थेन गच्छति ॥

तत्र प्रसङ्गेन उद्देश्य तीर्थेतरप्रसङ्गेनेत्यर्थः । परार्थेन वेतनं गृहीत्वेत्यर्थ इति वदन्ति ॥ प्रभासखण्डे परान्नेन गच्छतीति पाठः । तत्र परान्नं भुञ्जानः इत्यर्थः ॥

13A, इत्यनन्तदेवात्मजगोकुलदेवज्ञते तीर्थप्रघट्टके तीर्थयात्राविधिः : 14A, इति सकलभूमण्डलमण्डनायमान-विद्वद्वर्य्यापदेवसुतानन्तदेवात्मज-गोकुलदेवज्ञते तीर्थप्रघटके प्रयागविधिः ।

The last colophon is effaced. The chapter relates to the duties of the pilgrim at Gayā.

इति + + + + + + + +

अनन्तदेवात्मज-गोकुलदेवकृततीर्थकल्पलतायां गया + + +

+ + + + + + + +

2443.

8448. **काशीस्थितिचन्द्रिका।** *Kāsīsthiticandrikā.*

By Sadāsiva of the Dasaputtra family.

Substance, country-made paper. 11 × 4½ inches. Folia, 368 (by counting). Lines, 8 on a page. Character, Nāgara. Date, Sam. 1940. Appearance, fresh. Complete.

Colophon :—

इति श्रीदशपुत्रकुलावतंसेन सदाशिवेन कृता काशीस्थिति-चन्द्रिका समाप्ता।

Post Colophon :—

श्रीसाम्बसदाशिवार्पणमस्तु ॥

संवत् १९४० मिति कार्त्तिकसुदि १० वार शनिश्चर श्रीरस्तु मङ्गलमस्तु ॥

It contains informations about shrines and sacred spots in Kāsī, gleaned from various Purāṇas, under the patronage of Jaya Siṅha.

Beginning :—

श्रीवरदमूर्त्तिर्जयति ॥

विघ्नेशाभिधलिङ्गरूपममलं धृत्वाविमुक्ते सदा
जन्तूं स्तारयितुं महाघनिचयात् संसारतोपीश्वरः।
मायाजालविशोधनाय सततं यच्चाम्बया संस्थितः
तं देवं प्रणिपत्य [प्रणमामि] भक्तसुखदं भक्त्यैकगम्यं प्रभुं ॥
